श्री
भा०
टी०

ॐ श्रीगणेशाय नमः। ॐ नमो भगवते वासुदेवाय। ॐ नमः सरस्वत्यै। ॐ परमहंसास्वादितचरणकमलचिन्मकरं-
दाय भक्तजनमानसनिवासाय श्रीरामचंद्राय नमः। ॐ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि। यस्यास्ते हृदये सं-
वित्तं नृसिंहमहं भजे ॥१॥ ॐ विश्वसर्गविसर्गादिनवलक्षणलक्षितं। श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्
ॐ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ। वंदे परस्परात्मानौ परस्परनतिप्रियौ ॥३॥ ॐ श्रीकांते मदमतिः श्रीदेमे
घनतीरकविधेः किं तत्र परमाणुर्वै यत्र मज्जति मंदरः ॥४॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः। श्रीभागवतभा-
वार्थदीपिकेयं प्रतन्यते ॥५॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं। यत्कृपा तमहं वंदे परमानंदमाधवं ॥६॥ श्रीम
द्भागवतं नाम सर्गादिदशलक्षणं। महापुराणमत्यंतपवित्रं लक्ष्यते ॥७॥ तत्र केचन दशस्कंधेषु दशभिर्लक्षणै-
र्भगवतस्तद्देवविदः कथितं च विधु ब्रह्मानंदसब्रह्मसपदेति ॥८॥ श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः
सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः। द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः स
हस्राण्यलं पर्णान्यष्टदशेष्टदोऽतिसुलभो वर्वर्ति सर्वोपरि ॥१०॥ अथ नानापुराणशास्त्र
प्रबंधैश्चित्तप्रशांतिमलभमानस्तत्र तत्र परितप्यमानो नारदोपदेशात् श्रीमद्भागवतपु
राणं वर्तिनः प्रथमं श्रीमद्भागवतं शास्त्रमुपाक्रमत श्रीवेदव्यासस्तत्प्रतिपाद्य
देवतानुस्मरणलक्षणं मंगलमाचरति। ॐ जन्माद्यस्येति। ॐ
नमो भगवते नारायणाय पुरुषाय महात्मने। विश्वसर्गस्थित्यंताय सर्वभूतात्मने नमः
वासुदेवाय साक्षाय सर्वविदाय नमः ॥ ॐ
रामाय कमलचरणाय नमः ॥ ॐ श्री
कृष्णाय नमः।

श्रीम

परं परमेश्वरं धीमहीति ध्यायतेर्लिङि छांदसं ध्यायेमेत्यर्थः बहुवचनं शिष्याभिप्रायं तमेव स्वरूपतटस्थलक्षणाभ्यामु-
पलक्षयति तत्र स्वरूपलक्षणं सत्यमिति सत्यत्वे हेतुः यस्मिन् त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूते-
न्द्रियदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः अत्र दृष्टान्तः तेजोवारिमृदां
यथा विनिमयो व्यत्ययोऽन्यस्मिन्नन्यावभासः स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः तत्र तेजसि वारिबुद्धिः मरीचि-
तोये प्रसिद्धा मृदि काचादौ वारिबुद्धिः वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यं यद्वा तस्यैव परमार्थसत्यत्वप्र-
तिपादनाय तदितरस्य मिथ्यात्वमुक्तं यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति अनेन तत्तीनस्योपाधिसंबंधं वारयति
स्वेनैव धाम्ना महसा निरस्तं कुहकं कापट्यं यस्मिन् तं तटस्थलक्षणमाह जन्मादीति अस्य विश्वस्य जन्मस्थितिभंगा यतो

ॐ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः । तेजोवारि
मृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥ राम ॥

व्यावृत्तत्वात्

भवति ... तं धीमहीति तत्र हेतुः अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् अकार्ये-
भ्यः खपुष्पादिभ्यश्च व्यतिरेकात् यद्वान्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः अनुवृत्तत्वात् सद्रूपं ब्रह्म कार-
णं मृत्सुवर्णादिवत् व्यावृत्तत्वाद्विश्वं कार्यं घटकुंडलादिवदित्यर्थः यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि य-
तो भवतीति संबंधः तथा च श्रुतिः यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञास-
स्व । स्मृतिश्च यतः सर्वाणि भूतानि भवन्त्यादियुगागमे यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये इत्याद्या तर्हि किं प्रधा-
नं जगत्कारणत्वात् अयमभिप्रेतं नेत्याह अभिज्ञ इति स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत इति श्रु-
तेः ईक्षतेर्नाशब्दमिति न्यायाच्च तर्हि जीवः स्यात् नेत्याह स्वराट् स्वेनैव राजते यः तं स्वतःसिद्धज्ञानमित्यर्थः तर्हि किं ब्र-

नास्य परिकल्पितं प्रधानं जगत्कारणं न भवति तत्र हेतुः अशब्दमिति हेतुगर्भविशेषणमेतत् अशब्दत्वात् अवेदप्रमाणकत्वादित्यर्थः
वेदाप्रमाणकत्वे हेतुः ईक्षतेरिति धातुवाचके सति शब्दे लक्षणया धात्वर्थे लक्षणा परः ईक्षितृत्वश्रवणादित्यर्थः

श्री भाग. टी. १

स्मा. हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। तेनेति तेने इत्यादि आदिकवये ब्रह्मणे ब्रह्म वेदं यः तेने प्रकाशितवान्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः। ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धं सत्यं तत्तु हृदा मनसैव तेने। अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः। यथोक्तं। प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदताम्। ननु च ब्रह्मा स्वयमेव कस्मात् प्रतिबुद्धस्तत्र नेवेदमुपलभताम्। तेभ्यो ह्यस्मिन्नर्थे सूरयोऽपि मुह्यन्तीति तस्माद्ब्रह्मणोऽपि पराधीनज्ञानत्वात् न स्वतःसिद्धज्ञानः। परमेश्वर एव जगत्कारणं स एव सत्यः। अतः सत्यं परमार्थसत्यं सर्वज्ञत्वेन च निरस्तकुहकः तं धीमहीति गायत्र्याः प्रारम्भेण गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं। यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे। यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमिष्यते। लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्। प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिम्। अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम्। पुराणान्तरे च। ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारम्भस्तद्वै भागवतं विदुः। पुराणेष्वन्यतमं ... अवशिष्टकपोलकल्पितं भागवतं ... ह्यस्मिन्नाविर्भवत्विति। अत एव भागवतं नामान्यदित्यपि न शङ्कनीयम्॥१॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य काण्डत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति धर्म इति॥ राम २॥

प्रातःकाले हुतास्तथा हुता अग्नयो यैस्ते । सूतेनेति येनेति अभिनिवेशितस्तोमसाकल्यं दर्शितं इदं वक्ष्यमाणं आदरात् पप्रच्छुः ॥ ५ ॥ विविदिषितानर्थान्वक्तुं तस्य सर्वशास्त्रज्ञतामाविष्कुर्वन्ति त्वयेति त्रिभिः श्लोकैः ॥ ६ ॥ इतिहासो महाभारतादिः तत्सहितानि केवलमधीतानि अपितु आख्यातान्यपि व्याख्यातानि च । उत अपि यानि धर्मशास्त्राणि तान्यपि किं च यानीत्यादि विदां विद्वद्यो

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः । सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय ऊचुः । त्वया खलु पुराणानि सेतिहासानि चानघ । आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥ यानि वेदविदां श्रेष्ठो भगवान्बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् । ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्राञ्जसायुष्मन्भवता यद्विनिश्चितम् । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः । मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ १० ॥ भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः । अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥ ११ ॥ ब्रूहि नः श्रद्दधानानां येनात्मा संप्रसीदति । सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥ १२ ॥ रामश्री

मध्ये श्रेष्ठः व्यासः यानि वेद । परावरे सगुणनिर्गुणे ब्रह्मणी विदन्तीति तथा ॥ ७ ॥ वेत्थ जानासि सौम्य हे साधो तेषामनुग्रहात् ॥ तत्र हेतुमाह ब्रूयुरिति । स्निग्धस्य प्रेमवतः अत एव रहस्यमपि ब्रूयुरेव ॥ ८ ॥ पुंसामेकान्ततः श्रेयः अव्यभिचारि श्रेयः साधने ॥ ९ ॥ अन्ये तु बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चयं कुर्वन्तीति तत्र नेत्याह प्रायेणेति ॥ १० ॥ ११ ॥ १२ ॥

रित्यभूत्सायो ग्रसिन्युगे कलौ श्रस्याश्चघोजनाः नन्नापि भेदाश्चालस्माः नन्नापि समंदमभाव [illegible] नापि भेदभाग्याविष्णुकाला: न
चापि उपद्रुताचायादिभिः नच्चवद्रूपास्त्वावताापितावत्तेवफलसिद्धिस्यात्रू: भूरीणिकर्माणि यत्नुहेयोऽनियत्नुतानिस
मुह्यमयया वड्ड्रूपयेनयेनो हुनेवघनेनप्राप्नावृद्धिः संप्रसीदति सम्यग्यच्छाम्यति श्रोत्रं तरंस्तु तत्तानाासिश्रतिपंचभिः
भजेते तेभ्यो न्न्यका ना शीर्वादः आवाविरति श्रायेश्रुयादिगुणा: सात्वतीसच्छेद्नेसजन्यसूर्तिभिवानुडपास्यत याचि।
घतएषाममितिसात्वतोभक्ताः स्वार्थं श्रुण नात्मनवा यसादिवततस्वाश्चयाासार्थं नदेवेमात्रनहतिभवति तेषांया।
तिःपालकः यस्मार्थीविशेषस्य चिकीर्षयाव सदेवसभार्याघोदेवक्यांजातः संराहेसुततसोवागयितुमर्हसि साम्ना

देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया। तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥१२॥ यस्यावतारो भूतानां क्षेमाय च भवाय च। आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्। ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥१५॥ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धिकामो न शृणुयाद्यशः कलिमलापहं ॥१६॥ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥१७॥ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥१८॥

यत स्ताश्च यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये १३ तत्प्रभावमनुवर्णयति तदाह आपन्न इति कया।
माविक्रुवंति आपन्न इतिचिभिः ७ संसृतिमापन्नः प्राप्तः विवशोऽपितन्नामरटते: प्रवर्तनमयघतो नाम्नः भयमपिस्वये
विभेति किंचयस्यपादः संश्रयोयेषां मुनयः एव प्रशमं: प्रयनेवनं प्राप्रयोग्यायेषां तेमुनयः उपस्पृष्टाः संनिधिमात्रे
णासेविता: सद्यः पुनेतिस्वर्धुनीगंगात्स्याप्रापः नमूढान्निःसरताः अनलतेवयतिष्ठेति अनतत्सेवेयनप्रक्षालयेपु सन्ना
सेवया पुनंति नमयइतिश्रुतीनामुत्ककोर्ति: पुण्यश्लोकैः ईड्यानिस्तत्याानिकर्माणियस्यतस्ययथा: अथनीतरंतसेपति
उदाराणिमहांतिविवरस्पादीनिपरिगीतानिस्तौतिभिः कलांश्चयरुजादिस्त्रीः अथेतिप्रश्नानते श्रवतारकथाः स्थियस्यार्थ

श्रीमद्भागवतमहापुराणे [illegible] श्रीधरस्वामिकृतभावार्थदीपिका [illegible]

अत्रश्रीमतिसुंदरे श्रीभागवते परमोधर्मोनिरूप्यते परमत्वेहेतुः प्रकर्षेणोज्झितं कैतवंफलाभिसंधिलक्षणंकपटं यस्मिन्सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति अधिकारितोऽपि धर्मस्य परमत्वमाह निर्मत्सराणां परोत्कर्षासहनं मत्सरः तद्रहितानां सतां भूतानुकंपिनामेवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्त्वा ज्ञानकांडविषयेभ्योऽपि श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवः वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यं सुखेनैव ज्ञायते तेन किमत आह शिवदं परमसुखदं किंच आध्यात्मिकादितापत्रयोन्मूलनं च अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यमिति कर्तृतोऽपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते तदेवतत्कांडगतश्रैष्ठ्यमाह परैःशास्त्रै

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् २ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतं पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ३

स्तदुक्तैः साधनैर्वा ईश्वरो हृदि किं सद्य एव स्थिरीक्रियते वा शब्दः कटाक्षे किंतु विलंबेन कदाचिदेव अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह कृतिभिरिति अत्र किंचिज्ज्ञानपूर्वपुण्यवद्भिरित्यर्थः तस्मादत्र कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं अतो नित्यमेतदेव श्रोतव्यमिति भावः २ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते अपितु सर्वशास्त्रफलरूपमिदं अतः परमादरेण सेव्यमित्याह निगमेति निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्य फलमिदं भागवतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकमुखे निहितं तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णं नतूच्चनिपातात्स्फुटितमित्यर्थः ३ एतच्च भविष्यदपि भूतवन्निर्दिश्यते ... लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धं अत्र शुकोमुनिः अमृतद्रवसंयुतं रसः स एव द्रवः रसो वै सः

[illegible] तयोर्नैषेद [illegible]

कं दीभवतीति [illegible] अतः हे रसिकाः रसज्ञाः [illegible] भावुकाः हे रसविशेषभावनाचतुराः [illegible] निगमकल्पतरोर्गलितं [illegible] इदं भागवतं नाम फलं मुहुः पिबत । ननु त्वगष्ठ्यादिहेयांशरहितं फलं [illegible] । तथाहि [illegible] रसं अमृतरूपं [illegible] । [illegible] फलं [illegible] । तत्र फलं [illegible] । [illegible] फलम् [illegible] । आलयं लयो मोक्षः [illegible] । [illegible] आत्मारामा [illegible] । [illegible] । तदेवमनेन श्लोकत्रयेण [illegible] । [illegible] विषयप्रयोजनादि [illegible] नैमिषे [illegible] ॥

ॐ नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः । सत्रं स्वर्गायलोकाय सहस्रसममासत ॥ ४ ॥

इति । श्रीमद्भागवतविस्तरस्य वक्तव्यत्वेन [illegible] नैमिषे [illegible] । [illegible] मनोमयं [illegible] । [illegible] नेमिः [illegible] । [illegible] नैमिषं [illegible] । [illegible] सत्रं [illegible] स्वर्गाय लोकाय [illegible] । सहस्रसमाः संवत्सराः [illegible] आसत [illegible] ॥

श्री-
भाग-
टी-
५

एवं प्रश्नेषु षण्मुनिभिः कृते द्वितीयं तु ततः सूतः चतुर्णामाह तेषु च विभागमिति एवंभूतैः सम्यक्प्रश्नैः स
म्यक्हृष्टः रोमहर्षणस्यापत्यं रौमहर्षणिः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे आरब्धवान् प्रवचनस्योपक्रमे गुरुदेव
तानमस्कारं [illegible] १ तत्र स्वगुरोः श्रीशुकदेवस्य [illegible] प्रणमति [illegible]
[illegible] यद्यपि [illegible] तत्र हेतुः [illegible]
[illegible] द्वैपायनः श्रीव्यासदेवः विरहात् कातरो भीतः पुत्र इति स्नेहेन [illegible]

व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १ सूत उवाच
यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृ
दयं मुनिमानतोऽस्मि २ यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धं संसा
रिणां करुणयाह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ३ ॥ ॐ नमः श्रीरामचन्द्राय नमः

[illegible] स्वाभाव्यात् [illegible] तत्र हेतुः [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ३ ॥

एवमेतस्य नपुनरपि तच्चरितामेव श्रोतुमिच्छतः तद्वान्नतः तत्प्रभावमावेदयति । १८ । श्लोका यथा ग्रथितपुरुषार्थाः सत्‌ उत्कृष्टतमो यस्मात्सउत्तमः तथाभूतः श्लोको यस्य यशो तस्य विक्रमे न विशेषेण तृप्यामः । कुतस्तिप्तिनम्रसदेव प्रतिक्षणं नूतनमित्यर्थः इत्याभिमत्येनतनाम वयंतु नेति लाघवमालोच्य पूर्णम्पवाया रसज्ञानां भवद्यति ... रसिकानामेव ... स्वादुनोपि स्वादु अतः श्रीकृष्णचरितानि कथयेत्याशयेनाह । कृतवानिति त्रिभिः अतिमर्त्यानि ... कथनं

वयंतु नवितृप्याम उत्तमश्लोकविक्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ कृतवान्किल वीर्याणि सह रामेण केशवः अतिमर्त्यानि भगवान् गूढः कपटमानवः २० कलिमागतमाज्ञाय क्षेत्रेस्मिन्वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २१ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां कलिं सत्वहरं पुंसां कर्णधार इवार्णवं २२ अपि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः २३ इति श्रीभागवते महापुराणे प्रथमस्कंधे नैमिषीयोपाख्याने प्रथमोध्यायः १ ॥ ॥

नोद्भवणादीनि सङ्क्षेपतः संभावितानीमर्त्यानि ... न तु जन्माध्ययनादि ... कपटमानवः ... अतस्तज्ञः कलिमागतमाज्ञायेति श्रीविष्णुपदे ... दीर्घसत्रेण निमित्तेनासीनाः हरेः कथायां सक्षणाः ... २१ अस्मिंस्तु समये त्वद्दर्शनमीश्वरेणैव संपादितमिति प्रतिनन्दति त्वमिति २२ कलिं निस्तर्तुमिच्छतां ... नौका ... कर्णधारवत् पुनः प्रश्नान्तरं ब्रूहीति धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः अस्य वान्तरे ... धर्मज्ञानादिभिः सह स्वयं ... २३ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे

तदेवं श्रीहरिभक्तिद्वारा तदितरस्य वैराग्यपर्यवसानं [illegible] परो धर्म इत्युक्तं तस्याभक्तिरितरस्य [illegible] निष्फल
भोगो वैराग्यं [illegible] धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्मादिपरम्परेति च
[illegible] धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते इत्यादि तत्राह धर्मस्येति द्वाभ्याम् आपवर्ग्यस्योक्तन्यायेनापवर्गपर्यन्तस्य
तस्य अर्थाय फलत्वायार्थो नोपकल्पते योग्यो न भवति तथार्थस्यापि धर्मैकान्तस्य धर्म एवैकान्तः फलं यस्य तस्य कामो लाभाय फलत्वाय
न हि स्मृतो मुनिभिः कामस्य विषयभोगस्य इन्द्रियप्रीतिर्लाभः फलं न भवति किन्तु यावता जीवेत तावानेव कामस्य लाभः
जीवनपर्याप्तकामः सेव्य इत्यर्थः यदुक्तं आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंधारणार्थं प्राणाः संधार्याः
तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखमिति जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ९ कामस्य नेन्द्रिय-
प्रीतिर्लाभो जीवेत यावता जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः १० वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानम-
द्वयम् ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ११ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया पश्यन्त्यात्मनि
चात्मानं भक्त्या श्रुतगृहीतया १२ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरि-

सोऽर्थो न भवति किन्तु तत्त्वजिज्ञासैवेति ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित् तत्राह
तत्त्वविदस्तु तदेव तत्त्वं वदन्ति किं तत् ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं निवर्तयति ननु तत्त्वविदोऽपि विगीतव-
चना एव नैवं तस्यैव तत्त्वस्य नामान्तरैरभिधानादित्याह ब्रह्मेति औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवा-
निति अभिधीयते ९। १०। ११। तच्च तत्त्वं सपरिकरभक्त्यैव प्राप्यत इत्याह तच्छ्रद्दधाना इति ज्ञानवैराग्ययुक्तया ज्ञानप्र-
धान [illegible] तत्त्वमात्मनि [illegible] पश्यन्ति किं तत् आत्मानं परमात्मानं श्रुतेन वेदान्तादिश्रवणेन गृहीतया प्राप्तयेति भा-
[illegible] धर्मस्य फलं [illegible] नार्थकामादिः [illegible] अत इति [illegible] हरितोषण [illegible]

तत्व

जयत्यनेन संसारमिति जयो ग्रंथः तमुदीरयेदिति स्वयमेवोदीरयन् अत्रयो कालिकानुपशिक्षयति तेषां वचः प्रतिपूजयन्
तियवेकेनाभिसन्नतं केवलोति ४ स्वपृष्टत्वेन साधुपृष्टोऽभवतिनदहं पृष्टः यतो लोकानां मंगलमेतत् यतः श्रीकृष्णविष
यः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारस्य प्रश्नस्याप्युत्तरमिति पर्यवसानात् ५ तत्र यत् पृष्टं सर्वशास्त्रसारे ऐकान्तिकं
श्रेयो ब्रूहीति तत्राह स वै इति अयमर्थः धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च तत्र यः स्वर्गादिसाधनं स
प्रवृत्तिलक्षणः सोऽपरः यतस्तु धर्मात् भक्तिर्भवति स परो धर्मः स एवैकान्तिकश्रेय इति कथंभू
ता अहैतुकी हेतुः फलानुसन्धानं तद्रहिता अप्रतिहता विघ्नैरनभिभूता ६ ननु तमेवात्मानं वेदान्तवचनेन व्याख्याय ..

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ४ मुनयः साधु पृष्टोऽहं भ
वद्भिर्लोकमंगलं यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति ५ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे अ
हैतुक्यप्रतिहता ययात्मा सुप्रसीदति ६ वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं
ज्ञानं यत्तदहैतुकं ७ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः नोत्पादयेद्यदि रतिं श्रम एव हि केवलं
८

विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञानं प्रति साधनत्वं प्रसिद्धं तत्कथं भक्तिहेतुत्वमुच्यते तत्रा
भक्तिद्वारेणेत्याह वासुदेव इति अहैतुकं शुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः ७ व्यतिरेकमाह धर्म इति योऽ
र्थ इति प्रसिद्धः स यदि विष्वक्सेनकथासु रतिं नोत्पादयेत् तर्हि स्वनुष्ठितोऽपि सन् श्रम एव तेषां नन्वमी त्वार्थस्या
पि धर्मस्य श्रमत्वमस्तु अत आह केवलं विफलश्रम इत्यर्थः ननु तत्त्वापि स्वर्गादिफलमित्यादौ श्रुत्या एकैका
प्राप्तिराकरोति तथापि न तत्फलमित्यर्थः ननु तद्यथेह कर्मजितो लोकः क्षीयते सकृत्यं भवतीत्यादिश्रुतेः नतत्फ
लस्यापि स्वर्गादेः श्रमाशंकाऽऽह ह्रियशारेण साधयति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः
क्षीयते इति तर्कानुगृहीतया श्रुत्याफलस्यालयप्रतिपादनात् ८ ॥

श्री·
भाग·
टी·
६

अत्र सदाचारं दर्शयन्नेतदेव द्रढयति अत इति आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वन्तीति भजनीयविशेषो दर्शितः २२ ननु देवोपपादयितॄणां ब्रह्मादीनां त्रयाणामेकात्म्ये सति वासुदेवस्याधिक्यमाह सत्त्वमिति इह युगपदेक एव परः पुमान् अस्य विश्वस्य स्थित्यादये स्थित्यादिनिमित्तं तैर्युक्तः सन् हरिविरिञ्चिहरेति संज्ञा धत्ते तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः २३ उपाधिवैशिष्ट्ये न फलवैशिष्ट्यं सदृष्टान्तमाह पार्थिवात्तत्त्वं त्रिप्रकाशावहितात् दारुणः काष्ठाद्धूमः प्रकृतिस्वभावस्त्रयीमयो वेदोक्तकर्मप्रवर्तकः ईषत्प्रकाशकत्वात् तस्मादग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशाद्रजः रजसः सकाशात्सत्त्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं न तथा तमो नलयात्मकत्वात् तमसः सकाशाद्रजसः सोपाधिकत्वात् न तेन किञ्चिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रप्रकर्षेण तत्सर्वथा

अतो वै कवयो नित्यं भक्तिं परमया मुदा । वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम् ॥ २२ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २३ ॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः । तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनम् ॥ २४ ॥ भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् । सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥ २५ ॥ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ । नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ २६ ॥ रजस्तमःप्रकृतयः समशीला भजन्ति वै । पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥

तमसस्तु प्रकाशकत्वेऽपि तमसो नलयात्मकत्वात् [above line: विक्षेपकत्वात्] यस्मादेवं तस्मात्सत्त्वं ब्रह्मदर्शनम् अतस्तद्गुणोपाधीनां ब्रह्मादीनां विषयेऽप्येवं विशेष इति भावः २४ वासुदेवभक्तौ पूर्वाचारप्रमाणमाह भेजिरे इति अथ तोहेतोरग्रे पुरा विशुद्धसत्त्वमूर्तिं भगवन्तमधोक्षजं भेजिरे ये तानुवर्तन्ते ते इह संसारे क्षेमाय कल्पन्ते २५ ननु अन्यानपि केचिद्भजन्तो दृश्यन्ते सत्यं सकामास्तु ते न मुमुक्षव इति किं तत्सकाशात् एवमाह मुमुक्षव इति द्वाभ्याम् भूतपतीनिति पितृप्रजेशादीनामुपलक्षणम् अनसूयवः देवतान्तरनिन्दकाः सन्तः २६ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समशीलाः ये ते श्रियाद्यैश्वर्यप्रजाश्चेप्सन्तीति तथा ते २७ ॥ ११२

१२

एकेनएकाग्रेणामनसाभक्तिरहितोधर्मः केवलंश्रमइतिप्रपंचितं इदानींतुभक्तेःमुक्तिफलत्वंप्रपंचयति १५ यस्यानुध्यानु
ध्यानमेवासिःखड्गः तेनयुक्ताविवेकिनः ग्रंथिमहंकारंनिबध्नातियत्कर्मतच्छिंदंति तस्यकथायांरतिंप्रीतिंकोनकुर्या
त्. १५ ननुसत्यमेवंकमलिसंलिनीप्रीहिंसिकायारतिस्तथापितस्यांरुचिर्नोत्पद्यतेकिंकर्मः तत्राहशुश्रूषोरिति प्र
थमंतीर्थनिषेवणादितिर्निष्पापस्यमहत्सेवास्यात् तयाचतद्धर्मश्रद्धाततःश्रवणेच्छाततोरुचिःस्यादित्यर्थः १६ त
तःचशृण्वतामिति पुण्येश्रवणकीर्तनेयस्यसःसतांसुहृत्हितकारी हृदियानिअभद्राणिकामादिवासनास्तानि

तस्मादेकेनमनसाभगवान्सात्वतांपतिः श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा १४ यदनुध्यासिनायु
क्ताःकर्मग्रंथिनिबंधनं छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं १५ शुश्रूषोःश्रद्धधानस्यवासुदेव
कथारुचिः स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात् १६ शृण्वतांस्वकथाःकृष्णःपुण्यश्रवणकीर्त
नः हृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां १७ नष्टप्रायेष्वभद्रेषुनित्यंभागवतसेवया भगवत्युत्त
मश्लोकेभक्तिर्भवतिनैष्ठिकी १८ तदारजस्तमोभावाःकामलोभादयश्चये चेतएतैरनाविद्धंस्थितंसत्वे
प्रसीदति १९ एवंप्रसन्नमनसोभगवद्भक्तियोगतः भगवत्तत्वविज्ञानंमुक्तसंगस्यजायते २० भिद्यते
हृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिदृष्टएवात्मनीश्वरे २१ ॥ ॐश्रीकृष्णायनमः

श्रेतःस्थःहृदयस्थःछिनत्तीत्यर्थः १७ ननुनष्टप्रायेष्विति सर्वभद्राणांसम्यङ्नाशस्यकालत्वात् प्रायग्रह
णंभागवतानांश्रीभागवतशास्त्रस्यवासेवयानैष्ठिकीनिश्चलाविक्षेपकाभावात् रजश्चतमश्चयेचतत्प्रभवाभावाः
कामादयःतैरनाविद्धंअनभिभूतंप्रसीदतिउपशाम्यतिभगवद्भक्तियोगतःप्रसन्नमनसःअतएवमुक्तसंगस्यसा
नफलमाह भिद्यतेइति २० हृदयमेवग्रंथिः चिज्जडग्रथनरूपोहंकारः अतएवसर्वसंशयाःअसंभावना
दिरूपाःकर्माणिअनारब्धफलानिआत्मनिस्वस्वरूपभूतेईश्वरेदृष्टएवअहंकारात्तानाज्ञानातस्मैवेतिदर्शयति २१ ॥

श्री· भाग· टी· ८

लेशस्वरूपेणावतारागलीलामाह असौ इति भूतसूक्ष्माणींद्रियाणि चात्मा च मनस्तैः स्वनिर्मितेषु भूतेषु निर्विष्टो भुंक्ते इति भोगो। स्यानेवधीयते तद्गुणान् ... पालयतीति तदात्मने पद्म ... इदानीं तदवतारानाह भावयतीति पालयति एतत्सर्वावतारसाधारणम् ... अवतारस्य ... लोकभावनः लोकस्तदादिषु लीलावताराः तेषु ... इति श्रीमद्भागवतभावार्थदीपिकायां प्रथमस्कंधे द्वितीयोऽध्यायः २ अवतारकथा ... पुरुषावतारमाह ... यदुक्तं ... भगवतः ... अवतारं ... पुरुषस्य

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियादिभिः स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३३ भावयत्येष सत्त्वेन लोकान्वै लोकभावनः लीलावतारानुरतो देवतिर्यनरादिषु ३४ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयोऽध्यायः २ सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यांभसि शयानस्य योगनिद्रां वितन्वतः नाभिहृदांबुजादासीद्ब्रह्मा विश्वसृजांपतिः २ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ३ ॥

वतारमाह जगृहे इति त्रिभिः महदादिभिः सह अहंकारपंचतन्मात्रैरेकादशेंद्रियाणि पंच महाभूतानीति षोडश कला अंशा यस्मिन् १ ननु यद्यपि भगवद्विग्रहो नैवंभूतः तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासना र्थमेवमुक्तमिति द्रष्टव्यं कोऽसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसि संहृत्य विश्वं शयानस्य तत्र च योगः समाधिः तद्रूपां निद्रां विस्तारयतस्तस्य नाभिरेव हृदः तस्मिन्यदंबुजं तस्मात्कमलात् ब्रह्मासीत् तं भूत प्रत्येक लोकरूपं पुरुषं गृह्णे २ कीदृशं तद्रूपमित्यत आह यस्येति ननु कीदृशो विग्रहस्तस्य योंऽभसि शेते स्म तत्राह तद्वै भगव तो रूपं विशुद्धं रजआद्यसंभिन्नं अतएवोर्जितं निरतिशयं सत्त्वमेतच्चुर्योपि नाप्रसन्नमित्याह पश्यंतीति ३ ॥ ८

३

मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवः परः तात्पर्यगोचरो येषां
ते तथा वेदा मखपरा इति शंकां ते ऽपि तदाराधनार्थत्वात्तत्परा इत्युक्तं योगा योगशास्त्राणि तेषामासनप्राणा
यामादिक्रियापरत्वमाशंक्य तत्साम्यपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं २८ ज्ञानं ज्ञानशास्त्रं तच्च तत्त्वानपरमेवेत्याशंक्य
तानसत्यपि तत्परत्वमुक्तं तपो ऽत्र शास्त्रं धर्मो धर्मशास्त्रं दानव्रतादिविषयं तेनान्तर्गतं परमित्याशंक्याह स्वर्गेति गतिः
तत्स्वर्गादिफलं सापि तदानन्दांशरूपत्वात्परेवेत्युक्तं यद्वा वेदमनेनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्यु
क्तं तत्र तेषां तत्परत्वं यद्यप्यक्रियादीनां नानार्थपरत्वात्तदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति २९

वासुदेवपरा वेदा वासुदेवपरा मखाः वासुदेवपरा योगा वासुदेवपराः क्रियाः २८ वासुदेवपरं ज्ञानं वासु
देवपरं तपः वासुदेवपरो धर्मो वासुदेवपरा गतिः २९ स एवेदं ससर्जाग्रे भगवानात्ममायया सदसद्रूप
या चासौ गुणमय्यागुणो विभुः ३० तया विलसितेष्वेषु गुणेषु गुणवानिव अन्तःप्रविष्ट आभाति विज्ञा
नेन विजृम्भितः ३१ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ३२

ये ॥ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्तस्य वस्तुनि सर्वाणि समन्वयोऽस्त्यपने कथं वासुदेवप
रत्वं सर्वस्य ग्राह्यमस्त एवेति चतुर्भिः एतेरेव श्लोकैः तत्कर्मगुणद्वाराणि गृहीतिप्रश्नस्योत्तरं सदसद्रूपया कार्यका
रणात्मिकया गुणमय्या मायया स्वतो निर्गुणोऽपि सर्गप्रवेशः भगवतो जगत्कारणात्वमुक्तं प्रवेशनियमन लक्षणान्ली
लामाह तयेति ३० विलसितेषु तत्कार्येषु कार्याकारादिस्थितः प्रविष्टः सन् गुणवानिव तदधीनगुणाङ्गाभिमा
नवानिव न तु वस्तुतः यतो विज्ञानेन चिद्रूपेण विजृम्भितोऽजितः बहुरूपकलीलामाह यथेति ३१ स्वयो
निषु स्वाभिव्यञ्जकेषु दारुष्ववहितो निहितः विश्वात्मा पुमान्परमात्मा भूतेषु प्राणिषु अन्तर्यामितयापि प्रतियोनि नाना
त्वेन भासमानत्वमुच्यते ३२ ॥ राम ॥

अदभ्रं अनल्पं ज्ञानात्मकं चक्षुर्यस्य तेन सहस्रमपरिमितानि पादादीनि तैरद्भुतं सहस्रं मूर्धादयो यस्मिंस्तत् सहस्रं या
नि मौल्यादीनि उल्लसन्ति शोभमाने ४ एतल्लक्षणरूपं नानावतारवदा विशेषविभावयन्नाह ५ एतदादिनारायण
रूपं निधीयते यस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजत्वेपि नाशे बीजान्तरसंसक्तत्वं यथा तेन केवलम
वताराणामेव बीजं किंतु सर्वप्राणिनामित्याह यस्यांशांशेन यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिः तैर्नरं सन्तानं वा तावतैव
वितेत्याह स एवेति ५ कौमारस्याख्यः प्राजापत्यो मानवः इत्यादीनि सर्गविशेषनामानि यः षोडशे यजुर्वेदे सप।

पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्। सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यं
बरकुंडलोल्लसत् ४ एतन्नानावताराणां निधानं बीजमव्ययम्। यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ५
स एव प्रथमं देवः कौमारं सर्गमाश्रितः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितम् ६ द्वितीयं तु भवाया
स्य रसातलगतां महीम् उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ७ तृतीयमृषिसर्गं वै देवर्षित्वमुपे
त्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८ तुर्ये धर्मकलासर्गे नरनारायणावृषी भूत्वात्मोप
शमोपेतमकरोद्दुश्चरं तपः ९ ॥

वदेवः कौमाराख्यं सर्गमाश्रितः सनत्कुमारादिब्राह्मणो भूत्वा ब्रह्मचर्यं चचार ६ प्रथमद्वितीयादिशब्दा निर्देशमात्रा
पेक्षया अस्यविशेषस्य भावायोद्धवायमहीमुद्धरिष्यन्निति कर्मोक्तिः एवं सर्वेष्ववतारस्तत्क्रमं वा क्रमनियमं संधेयं॥
नावतारक्रमादस्तृतीयमिति ७ ऋषिसर्गमध्ये यत्र देवर्षित्वमुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पंचरात्रागममाचष्ट
कथितवान् यतस्तस्मात् त्रिगुणकर्मबंधहेतवस्तेभ्यः सकाशान्निष्कर्म्यं भवति तेषां भावो नैष्कर्म्यं कर्मणां मोचकत्वं यतो भवति त
दाचष्टेत्यर्थः ८ तुर्ये अवतारे धर्मस्य भार्यायां कलायां सर्गे इत्यर्थः प्रयोजनमाह आत्मनो यमनं तीर्थेन तपः सर्गं कृत्वा

श्री·
भाग्र·
टी·
४

शास्त्ररचेतनाम्मेदं प्राप्तणयतत्वनांग्रामस्यसंख्यानं कापिलो यस्मिंस्तत्सांख्यं । दत्तात्रेयावतारमाह षष्ठ इति ॥१०॥ अत्रेरपत्यत्वे
नैव वृतः सन् प्राप्तः । अत्रेरपत्यमभिकाङ्क्षतस्तमाह तुष्ट इति । वरस्मात्त्वात्मदत्तोऽनसूयया । मत्सदृशापत्यमिच्छता
मे वापुमदत्तान्निति दोष इति सत्वपर्विमर्षः । आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥११॥ यज्ञावतारमाह ततइति
स यज्ञो यामाद्यैः स्वैर्देवैः यामा नाम देवास्तदादिभिः सहसा स्वायंभुवनाममन्वन्तरं पालितवान् । तदा स्वयमिन्द्रोभूदित्यर्थः ।
ऋषभावतारमाह अष्टमेति । सर्वाश्रमनमस्कृतं मार्गं प्रमहंसानां धीराणां दर्शयन् नाभेः राज्ञो मेरुदेव्यां जातः ॥

१२
१३

पंचमः कपिलो नाम सिद्धेशः कालविप्लुतं । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ॥१०॥ षष्ठमत्रेरपत्यत्वं वृ-
तः प्राप्तोऽनसूयया । आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥११॥ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजा-
यत । स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ॥१२॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः । दर्शयन्वर्त्म धी-
राणां सर्वाश्रमनमस्कृतं ॥१३॥ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः । दुग्धेमामोषधीर्विप्रास्तेना-
यं स उशत्तमः ॥१४॥ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं ॥१५॥
सुरासुराणामुदधिं मथ्नतां मंदराचलं । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥१६॥ नामज्ञी

पार्थिवं राजदेहं पृथुरूपं प्राप्तो नरेन्द्रो ऽसौ इदं पार्थिवं ओषधीरिति उपलक्षणं । इमां पृथिवीं सर्वाणि वस्तूनि दुग्धवा
ड्डा गसा भावयार्थः । हे विप्रास्तेन पृथ्वीदोहनेन सोऽयमवतारः उशत्तमः । कमनीयतमः वश कान्ताविति तस्मात् ॥१४॥ म
त्स्यावतारमाह रूपमिति । चाक्षुषमन्वन्तरे य उदधिसंप्लवः तस्मिन्मह्यां पि मन्वन्तरावसानेऽप्रलये नासितया पि केन चि
त्तो तत्केन समग्रतायमायादर्शितः । यथाकौ डे मार्कंडेयायेति द्रष्टव्यं । तद्वी मय्यां नाविनौका रूपायां मह्यां मित्यर्थः ।
अपाद्रक्षितवान् । वैवस्वतमिति भाविनौ संज्ञा ॥१५॥ कूर्मावतारमाह सुरेति । कमठः कूर्मः तद्रूपेण कादशो वा पृष्ठे

स्कंधः १ अध्यायः ३॥

धान्वंतरावतारमाह धान्वंतरमिति धान्वंतरं धान्वंतरिरूपं द्वादशं सोद्गिरप्रयोगस्त्वार्थः त्रयोदशमेवरूपं न स्त्रीतेन सहदर्शयति अपाययदित्यस्य धाक्षिप्यद्यादूरः मोहिन्या स्त्रिया रूपेण ताम् सुरान्मोहयन् धान्वंतरिरूपेणासुरमानीयमोहि न्यापाययदित्यर्थः १७ नृसिंहावतारमाह चतुर्दशमिति नारसिंहं स्वरूपं बिभ्रत् यस्कं निर्ग्रथितरां १८ वामनाव तारमाह पंचदशमिति इष्टावामदे वामयतीति वामन रूपं स्वस्वा प्रत्यादित्सुः नस्मादाक्षिप्य गृहीतमिच्छुः १९ परशु रामावतारमाह अवतार इति त्रिः त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारानेकविंशतिवारानित्यर्थः २० व्यासाव

धान्वंतरं द्वादशमं त्रयोदशममेव च। अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया १७ चतुर्दशं नारसिंहं बिभ्रद्दै त्येंद्रमूर्जितं ददार करजैरूरावेरकां कटकृद्यथा १८ पंचदशं वामनकं कृत्वागादध्वरं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् १९ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरो न्महीं २० ततः सप्तदशे जातः सत्यवत्यां पराशरात् चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २१ नरदे वत्वमापन्नः सुरकार्यचिकीर्षया समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् २२ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी रामकृष्णाविति भुवो भगवानहरद्भरम् २३ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति २४ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २५॥

तारमाह तत इति अल्पमेधसोल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखा चक्रे २१ रामावतारमाह नरदेवत्वं राघवरूपे णप्राप्तः सन् २२ अतः परमष्टादशावतारं बलभद्रमाह विंशति तमं इति कृष्णे नकारलोपः छंदोनुरोधेन रामकृष्णा वितिरूपे जन्मनी प्राप्य २३ अञ्जनसुतः जिनसुत इति पाठे जिनः सएव कीकटदेशे गयाप्रदेशे २४ कल्क्यवतारमाह युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात् कल्किर्जनिष्यते अत्र क्रमसंग्रहार्थमाह अवतारा इति २५॥

राम राम राम राम राम

रामाति

प्रसंगोपयत्ते इत्येत: यथेति अविदासिनः उपक्षयशून्याद्देशात् इत्यस्मात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः वि
सृतो सहस्रशस्य इति २६ तत्र च विशेषमाह ऋषय इति ॥ २७ ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कला विभूतयश्च त
त्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्कारः। कुमारनारदादिष्वधि
कारिकेषु यथोपयोगमंशकलावेशः कृष्णस्तु साक्षाद्भगवान् नारायण एवाविर्भूतसर्वशक्ति
त्वात् सर्वेषां प्रयोजनमाह इन्द्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयन्ति सुखिनं कुर्वन्तीति एतत्कीर्तनफलमाह जन्म।

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः। यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः। २६ ऋषयो मनवो दे
वा मनुपुत्रा महौजसः। कलाः सर्वे हरेरेव सप्रजापतयस्तथा २७ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्व
यं। इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे। २८ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः। सायं प्रातर्गृणन्भ
क्त्या दुःखग्रामाद्विमुच्यते २९ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः। मायागुणैर्विरचितं महदादिभि
रात्मनि। ३० यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले। तथा द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ३१

ति २८ गुह्यमतिरहस्यं जन्म प्रयतः शुचिः सन् दुःखग्रामात्संसारान्मुच्यते इत्युक्तं तत्कथं देहद्वयसंबंधे सति तद्वि
च्छित्तिं विना मुक्तिः देहसंबंधश्च भगवन्मायोपाध्यविद्याविलसितत्वादतत्त्वं तच्छ्रवणादिजनितविद्यया निवृत्तिरुपप
द्यत इत्याशयेनाह एतदिति पंचभिः ३० अरूपस्य चिदेकरसस्यात्मनो जीवस्य तत्स्थूलं रूपं शरीरं भगवतो माया
यास्तद्गुणैर्महदादिरूपैर्विरचितं आत्मनि ज्ञानात्मस्थाने शारीरं कल्पितमित्यर्थः ३० कथमित्यपेक्षायां स्वरूपावरो
न तस्यासन्नद्विर्दृष्टान्तमाह यथा वायुस्थितो मेघौघो नभसि आकाशे बुद्धिभिरारोपितः यथा वा पार्थिवो रे
णुरन्तश्चरत्वादिष्वनिले एवं द्रष्टर्यात्मनि दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः किंच ३१ अत

अकर्तुः कर्माणि अजनस्य जन्मानि हृत्पतेर्वर्णयन्ति स्म तर्हि जीववदीश्वरस्य को विशेषः स्वातंत्र्यमेव विशेष इत्याह स वा इदमिति षाड्वर्गिकं इंद्रियषट्कवर्गविषयं जिघ्रति देवगंधवदुपभुङ्क्ते न तु सज्जते इत्यर्थः अतः षड्गुणेशः षडिंद्रियनियंता ३६ ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगो वा तत्राह नचेति धातुर्जगद्विधातुरीश्वरस्य ऊतीर्जगल्लीलाः कुमनीषः कुबुद्धिर्निपुणेन तर्कादिकौशलेन नावैति नामानि मनसा रूपाणि वचसा नामानि संतन्वतो विस्तारयतो वचोभिरिति वदन्त्येके नटस्याभिप्रायो यथा मनोवचोभिः सद्देतिवाभक्तः तर्हि किं विजानातीत्याह सवेदेति ३७ अमायया अकुटिलभा-

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ३५ स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् भूतेषु चान्तर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ३६ न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ३७ स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः योऽमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ३८ अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ३९ इदं भागवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवानृषिः ४० निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् तदिदं ग्राहयामास सुतमात्मविदां वरं ४१ सर्ववेदेतिहासानां सारं सारं समुद्धृतं स तु संश्रावयामास महाराजं परीक्षितं ४२ ॥

वेन संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजेत भक्तिमार्गेण प्रहृष्टान्तःकरणोऽभिनंदति अथेति ३८ यतो भक्त एव भगवन्तं जानाति अथातो भगवन्तः सर्वज्ञाः भवन्तो धन्याः कृतार्थाः कुतः यद्यस्मात् इत्थं ईदृशं वर्तमाना वासुदेवे आ-त्मभावं मनोऽनुरक्तिं कुर्वन्ति सर्वात्मकमैकांतिकं यस्मिन्नात्मभावे सति भूयः पुनर्जन्ममरणाद्यावर्तनं भवति न तत् किमेतच्छास्त्रमुपदिशन् यशः कथयसीत्याह इदमिति ३९ ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकचरितं यस्मिंस्तद्ऋषि-र्व्यासः न तु प्रदायग्रहणमित्याह तदिदमिति ४० सुतं शुकं ४१ ४२ ॥ राम

अतः स्थूलाद्रूपात्परमन्यदपि रूपमारोपितमित्याह अतेति कथंभूतं तत् यदव्यक्तं सूक्ष्मं न तस्य हेतुः अव्यूढगुणबृंहितमव्यूढाः करचरणादयो गुणाः परिणामाः तथाप्यपरिणता अव्यूढगुणास्तैर्बृंहितं तद्वितं वर्धितमाकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेव विवृणोति अदृष्टाश्रुतवस्तुत्वात् अकारविशेषवद्वस्त्वभावात् यच्चैवं कारविशेषवद्वस्तु तद् दृष्टं दृश्यते श्रूयते वा इदं दृष्टं तु न तथेत्यर्थः तस्य समेतं किंभूतं तदाह स जीवो जीवोपाधिः जीवो जीवत्वनिमित्तकः जीवो जीवोपाधिरिति जीवोपाधौ लिङ्गदेहे जीवशब्दप्रयोगात् जीवोपाधित्वं कुत इत्यर्थः ननु स्थूलस्यैव भोगायतनत्वाज्जीवोपाधित्वमिति किमन्यकल्पनयेत्यत आह यत्पुनर्भवः पुनर्जन्मोत्क्रान्तिगत्यादीनां तेन विना संभवत्विति भावः तदेनं जीवस्य रूपद्वयमाह ३२ यत्र यदेमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे

अतः परं यदव्यक्तमव्यूढगुणबृंहितम् । अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा । अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ ३३ ॥ यद्येषोपरता देवी माया वैशारदी मतिः । सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥

इति न तमेव हेतुमाह अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः कथं सम्यग्दर्शनं ज्ञानेन स्वरूपेण याऽपि भगवन्माया या संसृतिकारणभूता या विद्यमानत्वात् कथं ब्रह्मतां प्राप्नुयादिति ३३ अथ स देहे सदेहवच्चेद्यदि वेदाः प्रमाणं स्वविनिवृत्तवैशारदी विशारदः सर्वज्ञ ईश्वरः तदीया देवी सा च क्रीडनकरूपेणैव न निवर्तते एव समायाय्युपरता भवति किमिन्दुपरता भवेत् तत्राह मति विद्या अयं भावः यावदविद्यात्मना वर्त्माविक्षेपं करोति तावद्योप परमति सोऽपि स्वसंरक्षतीति यावत् यदात्मसेवविद्यारूपेणापरिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिन्धनाग्निवल्लयमेवोपसमेतीति तदा सम्पन्नो ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः किमतो यद्येवं स्वे महिम्नि परमानन्दस्वरूपे महीयते पूज्यते विराजते इत्यर्थः यथा जीवस्य जन्मादि मायया एवमीश्वरस्यापि जन्मकर्मादि माययेत्याह एवमिति ३५ रामम्बी॥

श्री-
भाग-
टी-
स्क-

एवंभूतेन सोकथमानंदितो नतान् कुरुजांगलान् वेनि देशविशेषाः तान् संप्राप्तः प्रथमं नतो गजसाह्वये विचरन् वनेन सहितः। साह्वये नाम यस्य तस्मिन् हस्तिनापुरे हस्तीनाम राजा तेन निर्मितत्वात् ९ एवं भूतेन मुनिना सहर्षः संवादः श्रवणायोग्यः गवतो ... तिष्ठति ७ गोदोहनमात्र कालं प्रतीतेन दर्पितमिताचार्यः ... तस्मादेव भूतो ... ईयतेन कथं येनाद्भभिमन्युसुतो नृपः ८ गृहाद्विकथयं ९ सम्राट्चक्रवर्ती दितिनिकेतस्य ... कस्मात्।

सुभनि

कथमासतितः पौरैः संप्राप्तः कुरुजांगलान् उन्मत्तमूकजडवद्विचरन्गजसाह्वये ९ कथंवा पाण्डवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ७ सगोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभाग तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ९ स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियम् १० नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ११ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् १२ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् १३ ॥

यथा तत्पृथिवाद श्रियं श्रिय ... शत्रुश्रियं संपदं सनात् १९ यस्य पादनिकेतं चरणपीठं। हस्तादायेनात्मानीय शत्रवोनमंति ... एवं सति ... मानसे पदं ... प्राणैः सुहृ विरक्तस्य किंचनादि ... ११ लोकस्य शिवाय सुखाय भवाय अभ्युदयाय भूतये ... जीवं ... मेत्ता ... नात्मार्थः एवं सति ... निर्विद्य विरज्य ... कलेवरं कुतो हेतोर्मुमोच नहि परोपजी ... स्वयं ... १२ यत्किंचन पृष्टोसि तत्सर्वं अस्माकं समाचक्ष्व यस्मात् वाचो विषये ... मन्ये वेदात् छांदसात् अन्यत्र ... इत्यादि ... सकथनं ... कलमव

...१२

प्रायोऽनशनपर्यन्तानशनेनोपविष्टमिति विशेषणोक्तिः ४३ हे विप्राः विप्रर्षेः सकाशात् ४४ अध्यगमं अधीतवानस्मि तत्र कीर्तयतस्तस्य निविष्टः [illegible] यथाधीतं न तु स्वमतिविलसितं तत्रापि यथामति मत्प्रज्ञानुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ४५ इति श्रीभावार्थदीपिकायां प्रथमस्कन्धे तृतीयः ३ तदेवं भगवदवतारेभ्यः [illegible] प्रवचनादिभिः इमं प्रसङ्गं श्रावयिष्यामीति सूतेनोक्ते मुनीनां बहूनां मध्ये एकेन वृद्धेन [illegible] कुलपतिः बह्वृचः बहूनामृचामध्येता इति न वक्तव्यं अतो वेदभूतत्वात् शौनकोऽब्रवीत् १ यथा कथामाह २ कस्मिन्स्थाने केन हेतुना महाभारतादिधर्मशास्त्राणि हि न

प्रायोपविष्टं गंगायां परीतं परमर्षिभिः। कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ४३ कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः। तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ४४ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात्। सोऽहं वः श्रावयिष्यामि यथाधीतं यथामति ४५ इति श्रीभागवते प्रथमस्कन्धे तृतीयोऽध्यायः ३ व्यास उवाच। इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम्। वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् १ शौनक उवाच। सूत सूत महाभाग वद नो वदतां वर। कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः २ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना। कुतः सञ्चोदितः कृष्णः कृतवान्संहितां मुनिः ३ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः। एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ४ दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं त

नैर्नैरेव तत्सौहित्यात् किं कार्यार्थः कृत इति सार्वविभक्तिकस्तसिः केन प्रवृत्तिहेत्वर्थः कृष्णो व्यासः मुनौ सन्संहितां श्रावयामास इति तत्र शुकस्य व्याख्यानादिकं कथं सिद्धमिति प्रश्नः तस्य अशेषो दासीनतां आह द्वाभ्यां तस्येति समदृक् समदृष्टिर्निपश्यति अतो निर्विकल्पकः सार्थकः निरस्तभेदः किं चैकान्ते एकस्मिन्नात्मनि मतिर्यस्य एवं भूतामतिर्यस्य उन्निद्रः मायाया अनावृतः यानिशा सर्वभूतानां तस्यां जागर्ति संयमीति स्मृतेः अतएव गूढः प्रकटोऽपि मूढ इव प्रतीयते निर्विकल्पत्वमेवाह दृष्ट्वेति ५ आत्मजं तं व्यासमनुयान्तं विसृष्टमनुगच्छन्तं दृष्ट्वा जलक्रीडां कुर्वत्यो देव्यो परिदधुः न्यासं पृथग्भूतं तत्र मनः अनग्नमपि तं व्यासं दृष्ट्वा ह्रिया वस्त्रं परिदधुः सुतं दृष्ट्वा न परिदधुः

द्वापरे समनुप्राप्ते तृतीये युगपर्यये परिवर्ते वासव्यां उपरिचरवसोः वीर्याज्जातायां सत्यवत्यां योगी
ज्ञानी व्यासो जातः १४ जलमुपस्पृश्य स्नानादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्तदेशे ऽस्मादिति विवेक्ता
पार्थसूक्तं अनेनैव बदरिकाश्रमस्थानं सूचितं १५ तत्र सर्वधर्मविहितानां धर्मादीनां निकरं तत्सर्वं वर्णाश्रमाणां यदि
न तद्ध्याविति तत्तीयेनान्वयः एवावज्ञातीमानागतमिति अव्यक्तं रंहो वेगो यस्य तेन कालेन प्रजाधर्माणां व्यति।

सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः १४ स कदाचि
त्सरस्वत्या उपस्पृश्य जलं शुचि विविक्त एक आसीन उदिते रविमण्डले १५ परावरज्ञः स ऋषिः कालेनाव्य
क्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे १६ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं अश्रद्द
धानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः १७ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यद्
दध्यौ हितममोघदृक् १८ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतु
र्विधं १९ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः इतिहासपुराणं च पंचमो वेद उच्यते २०
तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः वैशंपायन एवैको निष्णातो यजुषामुत २१ अथर्वांगिर
सामासीत्सुमंतुर्दारुणो मुनिः इतिहासपुराणानां पिता मे रोमहर्षणः २२ त एत ऋषयो वेदं स्वं स्वं
व्यस्यन्ननेकधा शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् २३ त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा
एवं चकार भगवान्व्यासः कृपणवत्सलः २४ ॥

कर्मसंकरं आश्रमसंकरं तथा भविष्यं युगे युगे १६ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्त्वान् धैर्यरहितान्
मेधारहितान् १७ तत्र सर्वहितं उपलक्षितानां चत्वारः ऋत्विजः होतारः यस्मिन् तत्चातुर्होत्रं एकं मत्वा होतृत्वेन द्विजः करे
यज्ञसंतत्यै यज्ञानामविच्छेदाय चतुर्विधमेवाह ऋगादि १९ उद्धृताः पृथक्कृताः २० दारुणः अथर्वोक्ताभिचा
रादिप्रवर्तकः २२ व्यस्यन् विभक्तवन्तः वेदविभागप्रयोजनमाह त एवेति २३ येन यथा मितमेधा विभिन्धंयेन तत एवं २४

श्री॰ भा॰ प्र॰ टी॰ १३

किं चेद्द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषां कर्मश्रेयसि श्रेयःसाधने एवं भवेत ॥२५॥ अत एव तेषामनुकंपया मुनिना भारतमाख्यानं कृतं ॥ अनेनैव प्रकारेण भवति भूतानां श्रेयसि हिते ॥२६॥ सर्वात्मकेनापि कर्मणा नातिप्रसीदद्धृदयं यस्य सः चित्तप्रसादमलभमानो वितर्कयन्निदमुवाच ॥२७॥ मानिताः पूजिताः गुरुशासनं आज्ञा ॥२८॥ देह्यो देहस्वामी जीवो यस्तु आत्मा विभुः स्वरूपेणैवात्मना स्वेन रूपेण तादात्म्यमप्राप्त इवाभाति ब्रह्मवर्चस्विनां श्रेष्ठोऽपि सन्

सीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा। कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥२५॥ इति भारतमाख्यानं कृपया मुनिना कृतं एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥२६॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः। नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥२७॥ वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित्। धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः ॥२८॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं। भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥२९॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥३०॥ तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः। असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ॥३१॥ किं वा भागवता धर्मा न प्रायेण निरूपिताः। प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः। कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतं ॥३२॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः। पूजयामास विधिवन्नारदं सुरपूजितं ॥३३॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे चतुर्थोऽध्यायः ॥४॥

तेजः तत्र साधवो ब्रह्मवर्चस्वी तेषु सत्तमोऽपि ... असंपन्न इवाभाति प्रत्युत ब्रह्मवर्चसवानपि ... ॥३१॥ ... किं वा भागवता धर्मा न प्रायेण निरूपिताः ... प्रियाः ॥३२॥ खिलं न्यूनं खेदं प्राप्नुवतः ... आगतो ... ॥३३॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे चतुर्थोऽध्यायः

२१

द्विदामिना

यं वसेत्सर्वधर्मेभ्यो हरिकीर्तनगोचरं॥ यस्मात् विप्रप्रसादायनारदेनोपदिश्यते॥ उपसमीपे आसीनं विप्रर्षिं हृद्भगवाम सोपस्यस्य युञ्जीयत् सञ्जिवमनेन तत्स्वप्रहैतिधीमिते॥ यद्वा इवेत्यनधिकारार्थमहोमहानपि शृग्वानीति समयमानः॥६॥ शारीरः शारीराभिमानी आत्मा आत्मनानेन शरीरेणाकवितिपवित्रयति मानस आत्मा मनो ऽभिमानी तेन मनसापवित्रयति । कच्चित्रोवारतिनिजिज्ञासित॥ आत्मनि इत्थं सा स्थितत्वर्तसंसपञ्चस्मृत्वा न सपिशाद्वादत्पुष्टिते चेमर्थः॥ अपि ॥ इति पावेसीबोधनेसपञ्जतेहेतुः महद्दस्तु तेरतिसर्वेर्थर्यसादिशिः परिहृदित्तंपरिप्राणः॥ किं च यत्सनातनं निमपरब्रह्मस्तत्वयाजिज्ञासितमथीनमथितो आत्मचेमर्थः॥ अप्याधिशोचसितत्किमर्थमिति शोमः॥४॥ आत्मपरारीमा

स्तेमत्व॥ अथ ते सप्तमासीनमुपासीनं हृत्कुवाः देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥१॥ श्रीनारद उवाच॥ पाराशर्य महाभाग भवतः कच्चिदात्मना। परितुष्यति शारीर आत्मा मानस एव वा ॥२॥ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम्। कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥३॥ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनम्। तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥४॥ वेदव्यास उवाच॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे। तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतम् ॥५॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः। परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः ॥६॥ त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी। परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥ राम

न सम्यक्त्वं नैतस्यापरितोषस्य कारणं अप्याहम पृच्छामहे नारद त्वां पृच्छामि आत्मभवात्मभूतं सात्मस्मात्मनो देहादुत्तमतः पवनानोयोनिशोभीतोषोयात्सतत्वा॥ अगाधबोधं तच्चयत्प्राह॥ सवेद्रुतिदाभ्यां परसर्वगुह्यं नीति हेतुर्वेत॥ यस्मात्पुराणः पुरुषः उपासितः त्वया कृपभूतः परावरेशः कार्यकारणानियंतामनसैव संकल्पमात्रेणगुणैः कृत्वा विश्वं सृजतीत्यादि ॥६॥ किं च त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन च प्राणात्मा वायुरिव सर्वप्राणिनामन्तश्चरः अत आत्मसाक्षी बुद्धिवृत्तिनां अतः परे ब्रह्मणि धर्मतो योगेन नित्यस्नातस्य ॥ यद्वा अन्यानुव्रतैः न॥ इत्यापारदमा हिंसादा व्रतस्वाध्याय कर्माणि अथवा परमोथमौपयोगे नान्यदर्शनं॥ अपवर्गोत्तिवेदाख्ये व्रतैः स्वाध्याये

श्रीमद्भागवतप्रथमस्कन्धे

अनुदितप्रायमवर्णितप्रायं भगवद्यशोऽमलं विना । येनैवेश्वरं मादृशाने वासौ भगवान्न तुष्येत् तद्दर्शनं ज्ञानं खिलं न्यूनं मन्ये न तु
भगवद्यशो वर्णनस्य न्यूनत्वमिति तात्पर्यम् ॥८॥ धर्मशास्त्रे धर्मादिवर्णनं चित्र तया धर्मादिरेवार्थो येन वासुदेवस्य महि
मा न तथा वर्णितः ॥ वासुदेवेऽपितैः यमुचितं विषयस्य सम्यग्वर्णनं विषयविशेषवर्णनं च विलसितेन यादृशेन किल अस्य विषय पदस्यापि यशो
हरेर्यशो न प्रगृणीत यत्तु यस्मिन्नीदृशं वाचकमन्तरेणापि काव्यानामनादिनीतिरस्याः तत्त्वमपि सम्यक्कृतः आनन्दसाः सत्वप्रधानेन मनसि
तेनामाह्लादस्य तेषां वागिन्द्रियमतिश्रुतिविद्वपि निःश्रेयसम्प्रति । उशिक्क्षयाः उशिक्कमनीयेऽक्षमनिवासो येषां ते ॥ य
था स्त्रीहेतु सामान्य संसर्वसिचरतः कामनीयपमेषु निवासः ॥ इति विविचारात् दिवसे कु दिहेतो हि काककीडास्थाने
